National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2024; 1(56): 192-193
© 2024 NJHSR
www.sanskritarticle.com

**सिमरन रवीन्द्र ठाकुर**
साहायकप्राध्यापिका, व्याकरणविभागः,
कविकुलगुरुकालिदाससंस्कृतविश्व-
विद्यालयः, रामटेकम्

**Correspondence:**
**सिमरन रवीन्द्र ठाकुर**
साहायकप्राध्यापिका, व्याकरणविभागः,
कविकुलगुरुकालिदाससंस्कृतविश्व-
विद्यालयः, रामटेकम्

# काशिकाध्ययनपद्धतेः कौमुद्यध्ययनपद्धतेः च तुलनात्मकम् अध्ययनम्

**सिमरन रवीन्द्र ठाकुर**

**शोधपत्रसारः**

संस्कृताध्ययनपद्धतिः बहुधा दृश्यते। यथा सिद्धान्तकौमुदी, काशिका, दीक्षितपुष्पापद्धतिः इत्यादि। संस्कृतव्याकरणस्य अध्ययनपद्धतौ भेदः अस्ति चेदपि फलं तु नूनमेव समानं प्राप्यते सर्वतः। त्रिमुनिपरम्पराया आधारभूतानि पाणिनीयानि सूत्राणि एव। तानि आदायैव प्रवर्तन्ते अध्ययनपद्धतयः। श्रीमद्भट्टोजिदीक्षितविरचितायां वैयाकरणसिद्धान्तकौमुद्यां प्रक्रियामादाय सूत्राणि प्रवृत्तानि। जयादित्यविरचितायां काशिकायां तु अष्टाध्यायीक्रमः आदृतः। उभयथा क्रमयोः कः भेदः इति इह चर्चितम्।

**शोधपद्धतिः**

अस्मिन् शोधपत्रे तुलनात्मकमध्ययनपद्धतिमादाय शोधपत्रमिदं साध्यते।

**सङ्केतशब्दाः**

वैयाकरणसिद्धान्तकौमुदी, काशिका, पाणिनिः, अष्टाध्यायी।

**विषयः**

संस्कृतभाषायाः व्याकरणमिदं सर्वभाषाव्याकरणेभ्यः भिन्नमस्ति। व्याकरणस्य शास्त्रत्वं तस्य नियामकत्वेनैव अवगन्तुं शक्यम्। यद्यपि ऐन्द्रादिबहूनि व्याकरणानि प्रसिद्धानि सन्ति अथापि पाणिन्यष्टकस्य काचिद्विशिष्टा एव शैली रचना चास्ति। अनेनापि क्रमेण अध्ययनं प्रचलति तन्नाम काशिकारीत्या। लक्ष्यानुरोधं सप्रकरणं च यः सूत्रक्रमः स कौमुदीक्रमः।

महर्षिणा पाणिनिना विरचितायाम् अष्टाध्याय्यां यः क्रमः आदृतः तमेव क्रममादाय काशिकायां सूत्रक्रमः उक्तः तथैव च प्रक्रिया साधिता। दीक्षितेन तु कौमुद्यां प्रकरणानि आरचितानि। तानि च प्रकरणानि आदाय प्रक्रियाः उक्ताः। काशिकायां साक्षाद् अष्टाध्यायीक्रमः आदृतः किन्तु कौमुद्यां तावद् रूपं वीक्ष्य प्रक्रियाक्रमः आदृतः। यथा – रामः इति रूपसिद्धिः इत्थं भवति –

रमु – क्रीडायाम् इति धातुः।

रम् + घञ् ……………… (**करणाधिकरणयोश्च**[1] इति सूत्रेण घञ्प्रत्ययः)

रम् + अ ……………….. (**हलन्त्यम्**[2], **चुटू**[3] इति सूत्राभ्यां इत्संज्ञायां **तस्य लोपः** इत्यनेन लोपः)

राम् + अ ………………… (**अत उपधायाः**[4] इति सूत्रेण उपधाकारस्य वृद्धिः)

राम ……………………… (**कृत्तद्धितसमासाश्च**[5] इति सूत्रेण प्रातिपदिकसंज्ञा)

राम + सु ………………… (**स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाङ्ङ्योस्सुप्**[6] इति सूत्रेण सुप्रत्ययः)

राम + स् ……………. (**उपदेशेऽजनुनासिक इत्**[7] इति सूत्रेण उकारस्य इत्संज्ञा, **तस्य लोपः** इत्यनेन लोपः)

राम + रु ………………… (**ससजुषो रुः**[8] इति सूत्रेण रुरादेशः)

राम + र् …………… (**उपदेशेऽजनुनासिक इत्** इति सूत्रेण उकारस्य इत्संज्ञा, **तस्य लोपः** इत्यनेन लोपः)

रामः ………………… (**खरवसानयोर्विसर्जनीयः**[9] इति सूत्रेण विसर्गः)

इत्येवं प्रकारेण **सुप्तिङन्तं पदम्**[10] इति सूत्रेण पदसंज्ञावतः रामः इत्यस्य सिद्धिः भवति। अत्र अस्माभिः सूत्राणां क्रममवलोक्य ज्ञातुं शक्यं यत् एकस्य रामः इति पदस्य सिद्धये आन्ता अष्टाध्यायी अपेक्षिता भवति काशिकाक्रमानुगुणम्। किन्तु सिद्धान्तकौमुदीदिशा राम इति शब्दः अदन्तः पुंलिङ्गः अस्ति अतः तत्प्रकरणे समाविष्टानि अपेक्षितानि सूत्राणि आदाय तत्सिद्धिः शक्या कर्तुम्।

किञ्च **वृद्धिरादैच्**[11], **अदेङ्गुणः**[12], **इको गुणवृद्धी**[13] इत्यनन्तरं **न धातुलोप आर्धधातुके**[14] इति सूत्रम् अस्ति। अस्यार्थस्तु एवम् - धात्वंशलोपनिमित्ते आर्धधातुके परे इको गुणवृद्धी न स्तः इति। एवञ्च अत्र साक्षात् क्रमेण पठिते सति आर्धधातुकसंज्ञा, लोपसंज्ञा, इक्प्रत्याहारज्ञानम् इत्येवं सर्वेऽपि अंशा अपेक्षिता भवन्ति। किन्तु इदमेव सूत्रं कौमुद्यां लक्ष्यानुरोधमेव यङन्तप्रकरणे अस्ति।

इत्थमेव बहुत्र द्रष्टुं शक्यम्। यथा –

- संज्ञाकथनोत्तरं तत्सम्बद्धः विधिः कथ्यते चेत् झटिति अवगमः स्याद्।
- कित्वाद्यतिदेशानां सप्रसङ्गम् उपस्थापनं योग्यं स्याद्।
- स्वरप्रकरणस्य एकत्राध्ययनं सुलभं स्याद्।
- वैदिकीप्रक्रिया सर्वान्ते यदि तर्हि सर्वप्रक्रियाज्ञानवशात् सौलभ्यं जनयेत्।

**फलम्**

उभयत्र पद्धत्योः अध्ययनेन एवं वक्तुं शक्यं यत् कौमुद्यध्ययनं तु नितरां सम्यगेव। यतो हि अधुना अल्पीयसिकाले अधिकं वाञ्छन्ति जनाः। एवं पथा अध्ययनेन हि किञ्चित् प्रकरणज्ञानं तु सम्पद्यते इति मन्ये। किन्तु काशिकापरम्परया अधीतं सुचारुरीत्या शास्त्रे नैपुण्यं सम्पादयति इत्यपि सम्यगेव। अतः उभयथा क्रमेण अध्ययनं सम्पादयितुं शक्यम् इति मन्ये।

**संदर्भ ग्रंथ:**


[1] पाणिनिसूत्रम् – ३.३.११७

[2] पाणिनिसूत्रम् – १.३.३

[3] पाणिनिसूत्रम् – १.३.९

[4] पाणिनिसूत्रम् – ७.२.११६

[5] पाणिनिसूत्रम् – १.२.४६

[6] पाणिनिसूत्रम् – ४.१.२

[7] पाणिनिसूत्रम् – १.३.२

[8] पाणिनिसूत्रम् – ८.२.६६

[9] पाणिनिसूत्रम् – ८.३.१५

[10] पाणिनिसूत्रम् – १.४.१४

[11] पाणिनिसूत्रम् – १.१.१

[12] पाणिनिसूत्रम् – १.१.२

[13] पाणिनिसूत्रम् – १.१.३

[14] पाणिनिसूत्रम् – १.१.४